रशनोत्कर्षी पीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः कर इति"। अत्र शृङ्गारस्य करुणाङ्गत्वात्तथात्वम् वाच्याङ्गव्यङ्ग्यं तत्र दृश्यम्।

**अपराङ्मुख** त्रि॰ न पराङ्मुखः न॰त॰। अनिवृत्ते कर्त्तव्यकर्म्मणोऽसोढ़तया ततोनिवृत्तिरहिते" स्त्रियां ङीप्।

**अपराच्** त्रि॰ न पराञ्चति परावर्त्तते परा+अञ्च–क्विन् न॰त॰। अनिवृत्ते परावृत्तभिन्ने स्त्रियां ङीप्।

**अपराजित** पु॰ परा+जि–क्त न॰त॰। शिवे, विष्णौ, तयोः केनाप्यपराजितत्वात्तथात्वम् ऋषिभेदे च। पराजितभिन्ने त्रि॰। दूर्वायां, शेफालिकायां, जयन्तीवृक्षे, असनवृक्षे, शङ्खिनीवृक्षे, हपुषावृक्षे असनपर्य्यायम्, ऐशान्यां दिशि "अपराजितां वास्थाय व्रजेद्दिशमजिह्मग" इति मनुः "अपाजितामैशानीं दिशमिति" कुल्लू॰। चतुर्द्दशाक्षरपादके "ननरसलगैः स्वरैरपराजितेति" वृ॰र॰ उक्ते छन्दोभेदे, दुर्गायां देव्यां "अपर्णा चापराजितेति" दुर्गास्तोत्रम् "नास्ति पराजितं शत्रोः पराजयो यस्याः ५त॰। विजयदशम्याम् पूजनेन अपराजयदातृदुर्गामूर्त्तिभेदे। सा च आश्विनशुक्लदशम्यां श्रवणयुतायामपराह्णे सन्ध्यायां वा पूज्या यथा हेमाद्रौ व्रतखण्डे "आश्विनशुक्लपक्षमुपक्रम्य" "दशम्यां च नरैः सम्यक् पूजनीयाऽपराजिता। क्षेमार्थं विजयार्थञ्च पूर्व्वोक्तविधिना नरैः। नवमीशेषयुक्तायां दशम्यामपराजिता। ददाति विजयं देवी पूजिता जयवर्द्धिनी" स्कान्दम्। "आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः। एकादश्यां न कुर्व्वीत पूजनञ्चापराजितमिति" निर्णयसिन्धौ स्कान्दम्। "उदये दशमी किञ्चित् संपूर्णैकादशी यदि, श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधेति" हेमाद्रौ काश्यपः। "कालेऽपराह्णे" इति निर्णयसिन्धुः। तस्याश्च अपराह्णपूज्यता हेमाद्रौ दर्शिता तत एव तदगवन्तव्यम्। "नाधयोव्याधयस्तस्य भवन्ति न पराजयः श्रियं पुण्यमवाप्नोति विजयञ्च सदा भुवीति" तत्पूजायाः फलत्वेन अपराजयस्योक्तेस्तस्यास्तथात्वम्। तत्पूजाङ्गदशम्या अपि अपराजयहेतुत्वात् विजयहेतुत्वाच्च अपराजितेति विजयेति च नाम अतएव "पूजनञ्चापराजित" मित्युक्तम् अपराजितामधिकृत्यकृतत्वात् पूजनस्यापराजितत्वम् तत्र पूजनप्रकारस्तु हेमाद्रौ व्रतखण्डे अपराजितदशमीप्रकरणे दृश्यः। योगिनीभेदे तत्स्वरूपं ध्यानशब्दे वक्ष्यते। अः विष्णुः पराजितः तुल्यवर्णतया यया। विष्णुक्रान्तायां स्वनामख्यातायां लतायां च स्त्री। अधिकं विजयदशम्यां वक्ष्यते।

**अपराद्ध** त्रि॰ अप+राध–कर्त्तरि क्त। अपराधिनि, स्वोचितकार्य्याकारके, स्खलिते च "निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितमिति" माघः भावे क्त। अपराधे।

**अपराद्धपृषत्क** पु॰ अपराद्धो लक्ष्यात् च्युतः पृषत्को वाणो यस्य। लक्ष्याग्राहिसायके धानुष्के।

**अपराद्धृ** त्रि॰ अप+राध–तृच्। अपराधकर्त्तरि स्वोचितकार्य्याकारके स्त्रियां ङीप्।

**अपराध** पु॰ अप+राध–घञ्। स्वोचितकर्म्माकरणे आगसि "कमपराधलवं मम पश्यसीति" सा॰द॰। दण्डयोग्यकर्म्मकरणे। "यथाऽपराधदण्डनामिति" रघुः। देवविषये अपराधश्च शास्त्रविध्युल्लङ्घनेन, निषिद्धसेवनेन च जातदुरितविशेषः। तत्र निगमे द्वात्रिंशद् अपराधा दर्शिता यथा "यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे। देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः॥ उच्छिष्टे वाथवाऽशौचे भगवद्दर्शनादिकम्। एकहस्तप्रणामश्च पुरस्तादप्रदक्षिणम्॥ पादप्रसारणं चाग्रे तथा पर्य्यङ्कबन्धनम्। शयनं भक्षणं वापि मिथ्याभाषणमेव च॥ उच्चैर्भाषा मिथोजल्पो रोदनानि च विग्रहः। निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम्॥ कम्बलावरणं चैव परनिन्दा परस्तुतिः। अश्लीलभाषणं चैव अधोवायुविमोक्षणम्॥ शक्तौ गौणोपचारश्च अनिवेदितभक्षणम्। तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणम्॥ विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिके। पृष्ठीकृत्यासनं चैव परेषामभिवादनम्॥ गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा। अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्त्तिताः इति"॥ आह्निकतत्त्वे तु वाराहमूलका अन्यविधा द्वात्रिंशत् दर्शिता यथा। "भगवद्भक्तानां क्षत्रियसिद्धान्नभोजनम् १ अनिषिद्धदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वाऽस्नात्वा विष्णोरुपसर्पणम् २ मृतं नरं स्पृष्ट्वाऽस्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा विष्णुगृहप्रवेशनम् ५ मानवं शवं स्पृष्ट्वाऽस्नात्वा विष्णुसन्निधाववस्थानम् ६ विष्णुं स्पृशतः पायुवायुप्रयोगः ७ विष्णोः कर्म्म कुर्वतः पुरीषत्यागः ८ विष्णुशास्त्रमनादृत्य शास्त्रान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपसर्पणम्। ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ क्रुद्धस्य विष्णु-